# ॥ श्री गुरु गीता ॥

अस्य श्री गुरुगीता स्तोत्रमन्त्रस्य ।
भगवान् सदाशिव ऋषिः ।
नानाविधानि छन्दांसि ।
श्री गुरुपरमात्मा देवता ।
हं बीजम् ।
सः शक्तिः ।
क्रों कीलकम् ।
श्री गुरुप्रसादसिद्ध्यर्थे पाठे विनियोगः ॥

## ॥ ध्यानम् ॥

हंसाभ्यां परिवृत्तपत्रकमलैर्दिव्यैर्जगत्कारणैर्-
विश्वोत्कीर्णमनेकदेहनिलयैः स्वच्छन्दमात्मेच्छया ।
तद्द्योतं पदशांभवं तु चरणं दीपाङ्कुरग्राहिणं
प्रत्यक्षाक्षरविग्रहं गुरुपदं ध्यायेद्विभुं शाश्वतम् ॥

सूत उवाच -

कैलास शिखरे रम्ये भक्तिसन्धाननायकम्।
प्रणम्य पार्वती भक्त्या शङ्करं पर्यपृच्छत ॥ १ ॥

श्री देव्युवाच -

ॐ नमो देवदेवेश परात्परजगद्गुरो।
सदाशिव महादेव गुरुदीक्षां प्रदेहि मे ॥ २ ॥

केन मार्गेण भो स्वामिन् देहि ब्रह्ममयो भवेत्।
त्वं कृपां कुरु मे स्वामिन् नमामि चरणौ तव ॥ ३ ॥

ईश्वर उवाच -

ममरूपासि देवि त्वं त्वत्प्रीत्यर्थं वदाम्यहम्।
लोकोपकारकः प्रश्नो न केनापि कृतः पुरा ॥ ४ ॥

दुर्लभं त्रिषु लोकेषु तच्छृणुष्व वदाम्यहम्।
गुरुं विना ब्रह्म नान्यत्सत्यं सत्यं वरानने ॥ ५ ॥

वेदशास्त्रपुराणानि इतिहासादिकानि च।
मन्त्रयन्त्रादिविद्याश्च स्मृतिरुच्चाटनादिकम् ॥ ६ ॥

शैवशाक्तागमादीनि अन्यानि विविधानि च ।
अपभ्रंशकराणीह जीवानां भ्रान्तचेतसाम् ॥ ७ ॥

यज्ञो व्रतं तपो दानं जपस्तीर्थं तथैव च ।
गुरुतत्त्वमविज्ञाय मूढास्ते चरते जनाः ॥ ८ ॥

गुरुर्बुद्ध्यात्मनो नान्यत् सत्यं सत्यं न संशयः ।
तल्लाभार्थं प्रयत्नस्तु कर्तव्यो हि मनीषिभिः ॥ ९ ॥

गूढ विद्या जगन्माया देहे चाज्ञानसंभवा ।
उदयो यत्प्रकाशेन गुरुशब्देन कथ्यते ॥ १० ॥

सर्वपापविशुद्धात्मा श्रीगुरोः पादसेवनात् ।
देही ब्रह्म भवेद्यस्मात्त्वत्कृपार्थं वदामि ते ॥ ११ ॥

गुरुपादांबुजं स्मृत्वा जलं शिरसि धारयेत् ।
सर्वतीर्थावगाहस्य संप्राप्नोति फलं नरः ॥ १२ ॥

शोषणं पापपङ्कस्य दीपनं ज्ञानतेजसाम् ।
गुरुपादोदकं सम्यक् संसारार्णवतारकम् ॥ १३ ॥

अज्ञानमूलहरणं जन्म कर्म निवारणम् ।
ज्ञानवैराग्यसिद्ध्यर्थं गुरुपादोदकं पिबेत् ॥ १४ ॥

गुरोः पादोदकं पीत्वा गुरोरुच्छिष्टभोजनम् ।
गुरुमूर्तेः सदा ध्यानं गुरुमन्त्रं सदा जपेत् ॥ १५ ॥

काशी क्षेत्रं तन्निवासो जाह्नवी चरणोदकम् ।
गुरुर्विश्वेश्वरः साक्षात् तारकं ब्रह्म निश्चितम् ॥ १६ ॥

गुरोः पादोदकं यत्तु गयाऽसौ सोऽक्षयो वटः ।
तीर्थराजः प्रयागश्च गुरुमूर्त्यै नमो नमः ॥ १७ ॥

गुरुमूर्तिं स्मरेन्नित्यं गुरुनाम सदा जपेत् ।
गुरोराज्ञां प्रकुर्वीत गुरोरन्यन्न भावयेत् ॥ १८ ॥

गुरुवक्त्रस्थितं ब्रह्म प्राप्यते तत्प्रसादतः ।
गुरोर्ध्यानं सदा कुर्यात्कुलस्त्री स्वपतेर्यथा ॥ १९ ॥

स्वाश्रमं च स्वजातिं च स्वकीर्तिपुष्टिवर्धनम् ।
एतत्सर्वं परित्यज्य गुरोरन्यन्न भावयेत् ॥ २० ॥

अनन्याश्चिन्तयन्तो मां सुलभं परमं पदम् ।
तस्मात् सर्वप्रयत्नेन गुरोराराधनं कुरु ॥ २१ ॥

त्रैलोक्ये स्फुटवक्तारो देवाद्यसुरपन्नगाः ।
गुरुवक्त्रस्थिता विद्या गुरुभक्त्या तु लभ्यते ॥ २२ ॥

गुकारस्त्वन्धकारश्च रुकारस्तेज उच्यते ।
अज्ञानग्रासकं ब्रह्म गुरुरेव न संशयः ॥ २३ ॥

गुकारः प्रथमो वर्णो मायादिगुणभासकः ।
रुकारो द्वितीयो ब्रह्म माया भ्रान्ति विनाशनम् ॥ २४ ॥

एवं गुरुपदं श्रेष्ठं देवानामपि दुर्लभम् ।
हाहा हूहू गणैश्चैव गन्धर्वैश्च प्रपूज्यते ॥ २५ ॥

ध्रुवं तेषां च सर्वेषां नास्ति तत्त्वं गुरोः परम् ।
आसनं शयनं वस्त्रं भूषणं वाहनादिकम् ॥ २६ ॥

साधकेन प्रदातव्यं गुरुसंतोषकारकम् ।
गुरोराराधनं कार्यं स्वजीवित्वं निवेदयेत् ॥ २७ ॥

कर्मणा मनसा वाचा नित्यमाराधयेद्गुरुम् ।
दीर्घदण्डं नमस्कृत्य निर्लज्जो गुरुसन्निधौ ॥ २८ ॥

शरीरमिन्द्रियं प्राणां सद्गुरुभ्यो निवेदयेत् ।
आत्मदारादिकं सर्वं सद्गुरुभ्यो निवेदयेत् ॥ २९ ॥

कृमिकीटभस्मविष्ठा दुर्गन्धिमलमूत्रकम् ।
श्लेष्मरक्तं त्वचा मांसं वञ्चयेन्न वरानने ॥ ३० ॥

संसारवृक्षमारूढाः पतन्तो नरकार्णवे ।
येन चैवोद्धृताः सर्वे तस्मै श्रीगुरवे नमः ॥ ३१ ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परब्रह्म तस्मै श्रीगुरवे नमः ॥ ३२ ॥

हेतवे जगतामेव संसारार्णवसेतवे ।
प्रभवे सर्वविद्यानां शम्भवे गुरवे नमः ॥ ३३ ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ३४ ॥

त्वं पिता त्वं च मे माता त्वं बन्धुस्त्वं च देवता ।
संसारप्रतिबोधार्थं तस्मै श्रीगुरवे नमः ॥ ३५ ॥

यत्सत्येन जगत्सत्यं यत्प्रकाशेन भाति तत् ।
यदानन्देन नन्दन्ति तस्मै श्रीगुरवे नमः ॥ ३६ ॥

यस्य स्थित्या सत्यमिदं यद्भाति भानुरूपतः ।
प्रियं पुत्रादि यत्प्रीत्या तस्मै श्रीगुरवे नमः ॥ ३७ ॥

येन चेतयते हीदं चित्तं चेतयते न यम् ।
जाग्रत्स्वप्नसुषुप्त्यादि तस्मै श्रीगुरवे नमः ॥ ३८ ॥

यस्य ज्ञानादिदं विश्वं न दृश्यं भिन्नभेदतः ।
सदेकरूपरूपाय तस्मै श्रीगुरवे नमः ॥ ३९ ॥

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अनन्यभाव भावाय तस्मै श्रीगुरवे नमः ॥ ४० ॥

यस्य कारणरूपस्य कार्यरूपेण भाति यत् ।
कार्यकारणरूपाय तस्मै श्रीगुरवे नमः ॥ ४१ ॥

नानारूपमिदं सर्वं न केनाप्यस्ति भिन्नता ।
कार्यकारणता चैव तस्मै श्रीगुरवे नमः ॥ ४२ ॥

यदङ्घ्रिकमलद्वन्द्वं द्वन्द्वतापनिवारकम् ।
तारकं सर्वदाऽपद्भ्यः श्रीगुरुं प्रणमाम्यहम् ॥ ४३ ॥

शिवे क्रुद्धे गुरुस्त्राता गुरौ क्रुद्धे शिवो न हि ।
तस्मात् सर्वप्रयत्नेन श्रीगुरुं शरणं व्रजेत् ॥ ४४ ॥

वन्दे गुरुपदद्वन्द्वं वाङ्मनश्चित्तगोचरम्
श्वेतरक्तप्रभाभिन्नं शिवशक्त्यात्मकं परम् ॥ ४५ ॥

गुकारं च गुणातीतं रुकारं रूपवर्जितम् ।
गुणातीतस्वरूपं च यो दद्यात्स गुरुः स्मृतः ॥ ४६ ॥

अत्रिनेत्रः सर्वसाक्षी अचतुर्बाहुरच्युतः ।
अचतुर्वदनो ब्रह्मा श्रीगुरुः कथितः प्रिये ॥ ४७ ॥

अयं मयाञ्जलिर्बद्धो दया सागरवृद्धये ।
यदनुग्रहतो जन्तुश्चित्रसंसारमुक्तिभाक् ॥ ४८ ॥

श्रीगुरोः परमं रूपं विवेकचक्षुषोऽमृतम् ।
मन्दभाग्या न पश्यन्ति अन्धाः सूर्योदयं यथा ॥ ४९ ॥

श्रीनाथचरणद्वन्द्वं यस्यां दिशि विराजते ।
तस्यै दिशे नमस्कुर्याद् भक्त्या प्रतिदिनं प्रिये ॥ ५० ॥

तस्यै दिशे सततमञ्जलिरेष आर्ये
प्रक्षिप्यते मुखरितो मधुपैर्बुधैश्च ।
जागर्ति यत्र भगवान्गुरुचक्रवर्ती
विश्वोदय प्रलयनाटकनित्यसाक्षी ॥ ५१ ॥

श्रीनाथादि गुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं बटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।
वीरान्द्व्यष्टचतुष्क षष्टि नवकं वीरावली पञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥ ५२ ॥

अभ्यस्तैः सकलैः सुदीर्घमनिलैर्व्याधिप्रदैर्दुष्करैः
प्राणायामशतैरनेककरणैर्दुःखात्मकैर्दुर्जयैः ।
यस्मिन्नभ्युदिते विनश्यति बली वायुः स्वयं तत्क्षणात्
प्राप्तुं तत्सहजं स्वभावमनिशं सेवध्वमेकं गुरुम् ॥ ५३ ॥

स्वदेशिकस्यैव शरीरचिन्तनं
भवेदनन्तस्य शिवस्य चिन्तनम् ।
स्वदेशिकस्यैव च नामकीर्तनं
भवेदनन्तस्य शिवस्य कीर्तनम् ॥ ५४ ॥

यत्पादरेणुकणिका कापि संसारवारिधेः ।
सेतुबन्धायते नाथं देशिकं तमुपास्महे ॥ ५५ ॥

यस्मादनुग्रहं लब्ध्वा महदज्ञानमुत्सृजेत् ।
तस्मै श्रीदेशिकेन्द्राय नमश्चाभीष्टसिद्धये ॥ ५६ ॥

पादाब्जं सर्वसंसारदावानलविनाशकम् ।
ब्रह्मरन्ध्रे सिताम्भोजमध्यस्थं चन्द्रमण्डले ॥ ५७ ॥

अकथादित्रिरेखाब्जे सहस्रदलमण्डले ।
हंसपार्श्वत्रिकोणे च स्मरेत्तन्मध्यगं गुरुम् ॥ ५८ ॥

सकलभुवनसृष्टिः कल्पिताशेषपुष्टिः
निखिलनिगमदृष्टिः सम्पदां व्यर्थदृष्टिः ।
अवगुणपरिमार्ष्टिस्तत्पदार्थैकदृष्टिः
भव गुणपरमेष्टिर्मोक्षमार्गैकदृष्टिः ॥ ५९ ॥

सकलभुवनरङ्गस्थापना स्तम्भयष्टिः
सकरुणरसवृष्टिस्तत्त्वमालासमष्टिः ।
सकलसमयसृष्टिः सच्चिदानन्ददृष्टिर्-
निवसतु मयि नित्यं श्रीगुरोर्दिव्यदृष्टिः ॥ ६० ॥

अग्निशुद्धसमं तात ज्वाला परिचकाधिया ।
मन्त्रराजमिमं मन्येऽहर्निशं पातु मृत्युतः ॥ ६१ ॥

तदेजति तन्नैजति तद्दूरे तत्समीपके ।
तदन्तरस्य सर्वस्य तदु सर्वस्य बाह्यतः ॥ ६२ ॥

अजोऽहमजरोऽहं च अनादिनिधनः स्वयम् ।
अविकारश्चिदानन्द अणीयान्महतो महान् ॥ ६३ ॥

अपूर्वाणां परं नित्यं स्वयंज्योतिर्निरामयम् ।
विरजं परमाकाशं ध्रुवमानन्दमव्ययम् ॥ ६४ ॥

श्रुतिः प्रत्यक्षमैतिह्यमनुमानश्चतुष्टयम् ।
यस्य चात्मतपो वेद देशिकं च सदा स्मरेत् ॥ ६५ ॥

मनुश्च यद्भवं कार्यं तद्वदामि महामते ।
साधुत्वं च मया दृष्ट्वा त्वयि तिष्ठति सांप्रतम् ॥ ६६ ॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ६७ ॥

सर्वश्रुतिशिरोरत्नविराजितपदाम्बुजः ।
वेदान्ताम्बुजसूर्यो यस्तस्मै श्रीगुरवे नमः ॥ ६८ ॥

यस्य स्मरणमात्रेण ज्ञानमुत्पद्यते स्वयम् ।
य एव सर्व संप्राप्तिस्तस्मै श्रीगुरवे नमः ॥ ६९ ॥

चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम् ।
नादबिन्दुकलातीतं तस्मै श्रीगुरवे नमः ॥ ७० ॥

स्थावरं जङ्गमं चैव तथा चैव चराचरम् ।
व्याप्तं येन जगत्सर्वं तस्मै श्रीगुरवे नमः ॥ ७१ ॥

ज्ञानशक्तिसमारूढस्तत्त्वमाला विभूषितः ।
भुक्तिमुक्तिप्रदाता यस्तस्मै श्रीगुरवे नमः ॥ ७२ ॥

अनेकजन्मसम्प्राप्तसर्वकर्मविदाहिने ।
स्वात्मज्ञानप्रभावेण तस्मै श्रीगुरवे नमः ॥ ७३ ॥

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः ।
तत्त्वं ज्ञानात्परं नास्ति तस्मै श्रीगुरवे नमः ॥ ७४ ॥

मन्नाथः श्रीजगन्नाथो मद्गुरुस्त्रिजगद्गुरुः ।
ममात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥ ७५ ॥

ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम् ।
मन्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥ ७६ ॥

गुरुरादिरनादिश्च गुरुः परमदैवतम् ।
गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः ॥ ७७ ॥

सप्तसागरपर्यन्त तीर्थस्नानादिकं फलम् ।
गुरोरङ्घ्रिपयोबिन्दुसहस्रांशे न दुर्लभम् ॥ ७८ ॥

हरौ रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
तस्मात्सर्वप्रयत्नेन श्रीगुरुं शरणं व्रजेत् ॥ ७९ ॥

गुरुरेव जगत्सर्वं ब्रह्मविष्णुशिवात्मकम् ।
गुरोः परतरं नास्ति तस्मात्संपूजयेद्गुरुम् ॥ ८० ॥

ज्ञानं विज्ञानसहितं लभ्यते गुरुभक्तितः।
गुरोः परतरं नास्ति ध्येयोऽसौ गुरुमार्गिभिः॥ ८१॥

यस्मात्परतरं नास्ति नेति नेतीति वै श्रुतिः।
मनसा वचसा चैव नित्यमाराधयेद्गुरुम्॥ ८२॥

गुरोः कृपा प्रसादेन ब्रह्मविष्णुसदाशिवाः।
समर्थाः प्रभवादौ च केवलं गुरुसेवया॥ ८३॥

देवकिन्नरगन्धर्वाः पितरो यक्षचारणाः।
मुनयोऽपि न जानन्ति गुरुशुश्रूषणे विधिम्॥ ८४॥

महाहङ्कारगर्वेण तपोविद्याबलान्विताः।
संसारकुहरावर्ते घटयन्त्रे यथा घटाः॥ ८५॥

न मुक्ता देवगन्धर्वाः पितरो यक्षकिन्नराः।
ऋषयः सर्वसिद्धाश्च गुरुसेवा पराङ्मुखाः॥ ८६॥

ध्यानं शृणु महादेवि सर्वानन्दप्रदायकम्।
सर्वसौख्यकरं नित्यं भुक्तिमुक्तिविधायकम्॥ ८७॥

श्रीमत्परब्रह्म गुरुं स्मरामि
श्रीमत्परब्रह्म गुरुं वदामि।
श्रीमत्परब्रह्म गुरुं नमामि
श्रीमत्परब्रह्म गुरुं भजामि ॥ ८८ ॥

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ ८९ ॥

नित्यं शुद्धं निराभासं निराकारं निरञ्जनम्।
नित्यबोधं चिदानन्दं गुरुं ब्रह्म नमाम्यहम् ॥ ९० ॥

हृदम्बुजे कर्णिकमध्यसंस्थे
सिंहासने संस्थितदिव्यमूर्तिम्।
ध्यायेद्गुरुं चन्द्रकलाप्रकाशं
चित्पुस्तकाभीष्टवरं दधानम् ॥ ९१ ॥

श्वेताम्बरं श्वेतविलेपपुष्पं
मुक्ताविभूषं मुदितं द्विनेत्रम् ।
वामाङ्कपीठस्थितदिव्यशक्तिं
मन्दस्मितं सान्द्रकृपानिधानम् ॥ ९२ ॥

आनन्दमानन्दकरं प्रसन्नं
ज्ञानस्वरूपं निजबोधयुक्तम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं
श्रीमद्गुरुं नित्यमहं नमामि ॥ ९३ ॥

यस्मिन्सृष्टिस्थितिध्वंसनिग्रहानुग्रहात्मकम् ।
कृत्यं पञ्चविधं शश्वद्भासते तं नमाम्यहम् ॥ ९४ ॥

प्रातः शिरसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुम् ।
वराभययुतं शान्तं स्मरेत्तं नामपूर्वकम् ॥ ९५ ॥

न गुरोरधिकं न गुरोरधिकं
न गुरोरधिकं न गुरोरधिकम् ।
शिवशासनतः शिवशासनतः
शिवशासनतः शिवशासनतः ॥ ९६ ॥

इदमेव शिवं त्विदमेव शिवं
त्विदमेव शिवं त्विदमेव शिवम् ।
मम शासनतो मम शासनतो
मम शासनतो मम शासनतः ॥ ९७ ॥

एवंविधं गुरुं ध्यात्वा ज्ञानमुत्पद्यते स्वयम् ।
तत्सद्गुरुप्रसादेन मुक्तोऽहमिति भावयेत् ॥ ९८ ॥

गुरुदर्शितमार्गेण मनःशुद्धिं तु कारयेत् ।
अनित्यं खण्डयेत्सर्वं यत्किञ्चिदात्मगोचरम् ॥ ९९ ॥

ज्ञेयं सर्वस्वरूपं च ज्ञानं च मन उच्यते ।
ज्ञानं ज्ञेयसमं कुर्यान् नान्यः पन्था द्वितीयकः ॥ १०० ॥

एवं श्रुत्वा महादेवि गुरुनिन्दां करोति यः ।
स याति नरकं घोरं यावच्चन्द्रदिवाकरौ ॥ १०१ ॥

यावत्कल्पान्तको देहस्तावदेव गुरुं स्मरेत् ।
गुरुलोपो न कर्तव्यः स्वच्छन्दो यदि वा भवेत् ॥ १०२ ॥

हुङ्कारेण न वक्तव्यं प्राज्ञैः शिष्यैः कथञ्चन ।
गुरोरग्रे न वक्तव्यमसत्यं च कदाचन ॥ १०३ ॥

गुरुं त्वंकृत्य हुंकृत्य गुरुं निर्जित्य वादतः ।
अरण्ये निर्जले देशे स भवेद्ब्रह्मराक्षसः ॥ १०४ ॥

मुनिभिः पन्नगैर्वाऽपि सुरैर्वा शापितो यदि ।
कालमृत्युभयाद्वापि गुरू रक्षति पार्वति ॥ १०५ ॥

अशक्ता हि सुराद्याश्च अशक्ता मुनयस्तथा ।
गुरुशापेन ते शीघ्रं क्षयं यान्ति न संशयः ॥ १०६ ॥

मन्त्रराजमिदं देवि गुरुरित्यक्षरद्वयम् ।
स्मृतिवेदार्थवाक्येन गुरुः साक्षात्परं पदम् ॥ १०७ ॥

श्रुतिस्मृती अविज्ञाय केवलं गुरुसेवकाः ।
ते वै संन्यासिनः प्रोक्ता इतरे वेषधारिणः ॥ १०८ ॥

नित्यं ब्रह्म निराकारं निर्गुणं बोधयेत् परम् ।
सर्वं ब्रह्म निराभासं दीपो दीपान्तरं यथा ॥ १०९ ॥

गुरोः कृपाप्रसादेन आत्मारामं निरीक्षयेत् ।
अनेन गुरुमार्गेण स्वात्मज्ञानं प्रवर्तते ॥ ११० ॥

आब्रह्म स्तंबपर्यन्तं परमात्मस्वरूपकम् ।
स्थावरं जङ्गमं चैव प्रणमामि जगन्मयम् ॥ १११ ॥

वन्देऽहं सच्चिदानन्दं भेदातीतं सदा गुरुम् ।
नित्यं पूर्णं निराकारं निर्गुणं स्वात्मसंस्थितम् ॥ ११२ ॥

परात्परतरं ध्येयं नित्यमानन्दकारकम् ।
हृदयाकाशमध्यस्थं शुद्धस्फटिकसन्निभम् ॥ ११३ ॥

स्फटिकप्रतिमारूपं दृश्यते दर्पणे यथा ।
तथात्मनि चिदाकारमानन्दं सोऽहमित्युत ॥ ११४ ॥

अङ्गुष्ठमात्रपुरुषं ध्यायतश्चिन्मयं हृदि ।
तत्र स्फुरति भावो यः शृणु तं कथयाम्यहम् ॥ ११५ ॥

अगोचरं तथाऽगम्यं नामरूपविवर्जितम् ।
निःशब्दं तद्विजानीयात् स्वभावं ब्रह्म पार्वति ॥ ११६ ॥

यथा गन्धः स्वभावेन कर्पूरकुसुमादिषु ।
शीतोष्णादि स्वभावेन तथा ब्रह्म च शाश्वतम् ॥ ११७ ॥

स्वयं तथाविधो भूत्वा स्थातव्यं यत्रकुत्रचित् ।
कीटभ्रमरवत्तत्र ध्यानं भवति तादृशम् ॥ ११८ ॥

गुरुध्यानं तथा कृत्वा स्वयं ब्रह्ममयो भवेत् ।
पिण्डे पदे तथा रूपे मुक्तोऽसौ नात्र संशयः ॥ ११९ ॥

श्री पार्वत्युवाच -

पिण्डं किं तु महादेव पदं किं समुदाहृतम् ।
रूपातीतं च रूपं किमेतदाख्याहि शङ्कर ॥ १२० ॥

श्री महादेव उवाच -

पिण्डं कुण्डलिनीशक्तिः पदं हंसमुदाहृतम् ।
रूपं बिन्दुरिति ज्ञेयं रूपातीतं निरञ्जनम् ॥ १२१ ॥

पिण्डे मुक्ता पदे मुक्ता रूपे मुक्ता वरानने ।
रूपातीते तु ये मुक्तास्ते मुक्ता नात्र संशयः ॥ १२२ ॥

स्वयं सर्वमयो भूत्वा परं तत्त्वं विलोकयेत् ।
परात्परतरं नान्यत् सर्वमेतन्निरालयम् ॥ १२३ ॥

तस्यावलोकनं प्राप्य सर्वसङ्गविवर्जितः ।
एकाकी निःस्पृहः शान्तस्तिष्ठासेत्तत्प्रसादतः ॥ १२४ ॥

लब्धं वाऽथ न लब्धं वा स्वल्पं वा बहुलं तथा ।
निष्कामेनैव भोक्तव्यं सदा संतुष्टचेतसा ॥ १२५ ॥

सर्वज्ञपदमित्याहुर्देही सर्वमयो बुधाः ।
सदानन्दः सदा शान्तो रमते यत्रकुत्रचित् ॥ १२६ ॥

यत्रैव तिष्ठते सोऽपि स देशः पुण्यभाजनम् ।
मुक्तस्य लक्षणं देवि तवाग्रे कथितं मया ॥ १२७ ॥

उपदेशस्तथा देवि गुरुमार्गेण मुक्तिदः ।
गुरुभक्तिस्तथा ध्यानं सकलं तव कीर्तितम् ॥ १२८ ॥

अनेन यद्भवेत्कार्यं तद्वदामि महामते ।
लोकोपकारकं देवि लौकिकं तु न भावयेत् ॥ १२९ ॥

लौकिकात्कर्मणो यान्ति ज्ञानहीना भवार्णवम् ।
ज्ञानी तु भावयेत्सर्वं कर्म निष्कर्म यत्कृतम् ॥ १३० ॥

इदं तु भक्तिभावेन पठते शृणुते यदि ।
लिखित्वा तत्प्रदातव्यं तत्सर्वं सफलं भवेत् ॥ १३१ ॥

गुरुगीतात्मकं देवि शुद्धतत्त्वं मयोदितम् ।
भवव्याधिविनाशार्थं स्वयमेव जपेत्सदा ॥ १३२ ॥

गुरुगीताक्षरैकं तु मन्त्रराजमिमं जपेत् ।
अन्ये च विविधा मन्त्राः कलां नार्हन्ति षोडशीम् ॥ १३३ ॥

अनन्तफलमाप्नोति गुरुगीताजपेन तु ।
सर्वपापप्रशमनं सर्वदारिद्र्यनाशनम् ॥ १३४ ॥

कालमृत्युभयहरं सर्वसङ्कटनाशनम् ।
यक्षराक्षसभूतानां चोरव्याघ्रभयापहम् ॥ १३५ ॥

महाव्याधिहरं सर्वं विभूतिसिद्धिदं भवेत् ।
अथवा मोहनं वश्यं स्वयमेव जपेत्सदा ॥ १३६ ॥

वस्त्रासने च दारिद्र्यं पाषाणे रोगसंभवः ।
मेदिन्यां दुःखमाप्नोति काष्ठे भवति निष्फलम् ॥ १३७ ॥

कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्री व्याघ्रचर्मणि ।
कुशासने ज्ञानसिद्धिः सर्वसिद्धिस्तु कंबले ॥ १३८ ॥

कुशैर्वा दूर्वया देवि आसने शुभ्रकंबले ।
उपविश्य ततो देवि जपेदेकाग्रमानसः ॥ १३९ ॥

ध्येयं शुक्लं च शान्त्यर्थं वश्ये रक्तासनं प्रिये ।
अभिचारे कृष्णवर्णं पीतवर्णं धनागमे ॥ १४० ॥

उत्तरे शान्तिकामस्तु वश्ये पूर्वमुखो जपेत् ।
दक्षिणे मारणं प्रोक्तं पश्चिमे च धनागमः ॥ १४१ ॥

मोहनं सर्वभूतानां बन्धमोक्षकरं भवेत् ।
देवराजप्रियकरं सर्वलोकवशं भवेत् ॥ १४२ ॥

सर्वेषां स्तंभनकरं गुणानां च विवर्धनम् ।
दुष्कर्मनाशनं चैव सुकर्मसिद्धिदं भवेत् ॥ १४३ ॥

असिद्धं साधयेत्कार्यं नवग्रहभयापहम् ।
दुःस्वप्ननाशनं चैव सुस्वप्नफलदायकम् ॥ १४४ ॥

सर्वशान्तिकरं नित्यं तथा वन्ध्यासुपुत्रदम् ।
अवैधव्यकरं स्त्रीणां सौभाग्यदायकं सदा ॥ १४५ ॥

आयुरारोग्यमैश्वर्यपुत्रपौत्रप्रवर्धनम् ।
अकामतः स्त्री विधवा जपान्मोक्षमवाप्नुयात् ॥ १४६ ॥

अवैधव्यं सकामा तु लभते चान्यजन्मनि ।
सर्वदुःखभयं विघ्नं नाशयेच्छापहारकम् ॥ १४७ ॥

सर्वबाधाप्रशमनं धर्मार्थकाममोक्षदम् ।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम् ॥ १४८ ॥

कामितस्य कामधेनुः कल्पनाकल्पपादपः ।
चिन्तामणिश्चिन्तितस्य सर्वमङ्गलकारकम् ॥ १४९ ॥

मोक्षहेतुर्जपेन्नित्यं मोक्षश्रियमवाप्नुयात् ।
भोगकामो जपेद्यो वै तस्य कामफलप्रदम् ॥ १५० ॥

जपेच्छाक्तश्च सौरश्च गाणपत्यश्च वैष्णवः ।
शैवश्च सिद्धिदं देवि सत्यं सत्यं न संशयः ॥ १५१ ॥

अथ काम्यजपे स्थानं कथयामि वरानने ।
सागरे वा सरित्तीरेऽथवा हरिहरालये ॥ १५२ ॥

शक्तिदेवालये गोष्ठे सर्वदेवालये शुभे ।
वटे च धात्रीमूले वा मठे वृन्दावने तथा ॥ १५३ ॥

पवित्रे निर्मले स्थाने नित्यानुष्ठानतोऽपि वा ।
निर्वेदनेन मौनेन जपमेतं समाचरेत् ॥ १५४ ॥

श्मशाने भयभूमौ तु वटमूलान्तिके तथा ।
सिद्ध्यन्ति धौत्तरे मूले चूतवृक्षस्य सन्निधौ ॥ १५५ ॥

गुरुपुत्रो वरं मूर्खस्तस्य सिद्ध्यन्ति नान्यथा ।
शुभकर्माणि सर्वाणि दीक्षाव्रततपांसि च ॥ १५६ ॥

संसारमलनाशार्थं भवपाशनिवृत्तये ।
गुरुगीताम्भसि स्नानं तत्त्वज्ञः कुरुते सदा ॥ १५७ ॥

स एव च गुरुः साक्षात् सदा सद्ब्रह्मवित्तमः ।
तस्य स्थानानि सर्वाणि पवित्राणि न संशयः ॥ १५८ ॥

सर्वशुद्धः पवित्रोऽसौ स्वभावाद्यत्र तिष्ठति ।
तत्र देवगणाः सर्वे क्षेत्रे पीठे वसन्ति हि ॥ १५९ ॥

आसनस्थः शयानो वा गच्छंस्तिष्ठन् वदन्नपि ।
अश्वारूढो गजारूढः सुप्तो वा जागृतोऽपि वा ॥ १६० ॥

शुचिष्मांश्च सदा ज्ञानी गुरुगीताजपेन तु ।
तस्य दर्शनमात्रेण पुनर्जन्म न विद्यते ॥ १६१ ॥

समुद्रे च यथा तोयं क्षीरे क्षीरं घृते घृतम् ।
भिन्ने कुंभे यथाकाशस्तथात्मा परमात्मनि ॥ १६२ ॥

तथैव ज्ञानी जीवात्मा परमात्मनि लीयते ।
ऐक्येन रमते ज्ञानी यत्र तत्र दिवानिशम् ॥ १६३ ॥

एवंविधो महामुक्तः सर्वदा वर्तते बुधः ।
तस्य सर्वप्रयत्नेन भावभक्तिं करोति यः ॥ १६४ ॥

सर्वसन्देहरहितो मुक्तो भवति पार्वति ।
भुक्तिमुक्तिद्वयं तस्य जिह्वाग्रे च सरस्वती ॥ १६५ ॥

अनेन प्राणिनः सर्वे गुरुगीता जपेन तु ।
सर्वसिद्धिं प्राप्नुवन्ति भुक्तिं मुक्तिं न संशयः ॥ १६६ ॥

सत्यं सत्यं पुनः सत्यं धर्म्यं साङ्ख्यं मयोदितम्।
गुरुगीतासमं नास्ति सत्यं सत्यं वरानने ॥ १६७ ॥

एको देव एकधर्म एकनिष्ठा परं तपः।
गुरोः परतरं नान्यन्नास्ति तत्त्वं गुरोः परम्॥ १६८ ॥

माता धन्या पिता धन्यो धन्यो वंशः कुलं तथा।
धन्या च वसुधा देवि गुरुभक्तिः सुदुर्लभा ॥ १६९ ॥

शरीरमिन्द्रियं प्राणाश्चार्थः स्वजनबान्धवाः।
माता पिता कुलं देवि गुरुरेव न संशयः ॥ १७० ॥

आकल्पजन्मना कोट्या जपव्रततपःक्रियाः।
तत्सर्वं सफलं देवि गुरुसंतोषमात्रतः ॥ १७१ ॥

विद्यातपोबलेनैव मन्दभाग्याश्च ये नराः।
गुरुसेवां न कुर्वन्ति सत्यं सत्यं वरानने ॥ १७२ ॥

ब्रह्मविष्णुमहेशाश्च देवर्षिपितृकिन्नराः।
सिद्धचारणयक्षाश्च अन्येऽपि मुनयो जनाः ॥ १७३ ॥

गुरुभावः परं तीर्थमन्यतीर्थं निरर्थकम्।
सर्वतीर्थाश्रयं देवि पादाङ्गुष्ठं च वर्तते ॥ १७४ ॥

जपेन जयमाप्नोति चानन्तफलमाप्नुयात्।
हीनकर्म त्यजन्सर्वं स्थानानि चाधमानि च ॥ १७५ ॥

जपं हीनासनं कुर्वन्हीनकर्मफलप्रदम्।
गुरुगीतां प्रयाणे वा सङ्ग्रामे रिपुसङ्कटे ॥ १७६ ॥

जपञ्जयमवाप्नोति मरणे मुक्तिदायकम्।
सर्वकर्म च सर्वत्र गुरुपुत्रस्य सिद्ध्यति ॥ १७७ ॥

इदं रहस्यं नो वाच्यं तवाग्रे कथितं मया।
सुगोप्यं च प्रयत्नेन मम त्वं च प्रिया त्विति ॥ १७८ ॥

स्वामि मुख्यगणेशादि विष्णवादीनां च पार्वति।
मनसापि न वक्तव्यं सत्यं सत्यं वदाम्यहम्॥ १७९ ॥

अतीवपक्वचित्ताय श्रद्धाभक्तियुताय च।
प्रवक्तव्यमिदं देवि ममात्माऽसि सदा प्रिये ॥ १८० ॥

अभक्ते वञ्चके धूर्ते पाखण्डे नास्तिके नरे।
मनसापि न वक्तव्या गुरुगीता कदाचन ॥ १८१ ॥

संसारसागरसमुद्धरणैकमन्त्रं
ब्रह्मादिदेवमुनिपूजितसिद्धमन्त्रम् ॥
दारिद्र्यदुःखभवरोगविनाशमन्त्रं
वन्दे महाभयहरं गुरुराजमन्त्रम् ॥ १८२ ॥

॥ इति श्रीस्कन्दपुराणे उत्तरखण्डे ईश्वरपार्वतीसंवादे
गुरुगीता समाप्ता ॥

॥ श्री गुरुदेव चरणार्पणमस्तु ॥